# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्यः** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – नव्यन्यायः** | **सत्रम् – २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – हेत्वाभाससामान्यनिरुक्तिः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ द्वयोः व्याख्यां लिखत।**

१ सोदाहरणं हेत्वाभासपञ्चकं व्याख्यात ।

२ लक्षणस्थ यद्विषयकत्वपदं स्पष्टयत ।

३ सोदाहरणं प्रयोज्यप्रयोजकभावं विशदयत ।

४ व्यभिचारलक्षणे दोषमुद्भाव्य परिहरत ।

**प्रश्नः २** यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम् । व्याख्यात ।

**प्रश्नः ३** बाधलक्षणे दोषमुद्भाव्य परिहरत ।

**प्रश्नः ४** अनुमितिं प्रति हेत्वाभासस्य प्रतिबन्धकत्वं प्रतिपादयत ।

**प्रश्नः ५** ज्ञानविरोधित्वञ्च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वम् । व्याख्यात ।

**प्रश्नः ६ द्वयोः व्याख्यां लिखत।**

१ उदाहरणपुरस्सरम् उपाधेर्लक्षणं विवेचयत ।

२ शब्दो अनित्यः शब्दत्वात् इत्यत्र असाधारण्ये अव्याप्तिमुपस्थाप्यताम् ।

३ साध्यनिश्चयोत्तरं कथमनुमितिः । व्याख्यात ।

४ सोदाहरणम् अनुमितिप्रतिबन्धकत्वं विशदयत ।

**प्रश्नः ७** सत्प्रतिपक्षलक्षणस्य तृतीयलक्षणानुगुणं समन्वयं कुरुत ।

**प्रश्नः ८** विरोधिसामग्रीसमवहितोऽपि च लिङ्गपरामर्शो न स्वसाध्यानुमितेः प्रतिबन्धकः । दीधितिवचनं विशदयत ।

**प्रश्नः ९** ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वम् । विशदयत ।

**प्रश्नः १०** बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वम् ।

व्याख्यात ।

**प्रश्नः ११ दश समाधेयाः ।**

१ किन्नाम विरोधिपरामर्शः?

२ द्वितीयं लक्षणं लिखत ।

३ तृतीयं लक्षणं लिखत ।

४ भ्रमस्थलस्योदाहरणं लिखत ।

५ प्रमेयं गगनवत् वाच्यत्वात् – इत्यत्र कः दोषः?

६ निर्वह्निः पवितो वह्निमान् धूमात् इत्यत्र कुत्र अतिव्याप्तिः?

७ किन्नाम प्रतिबन्धकत्वम् ?

८ आश्रयासिद्धेरुदाहरणं लिखत ।

९ सत्प्रतिपक्षः कं प्रतिबध्नाति ?

१० व्यभिचारलक्षणं लिखत ।

११ पञ्च हेत्वाभासाः के ?

१२ दीधितिकारः कः?

१३ ह्रदो वह्निमान् धूमात् – इत्यत्र कः दोषः ?

१४ सत्ताधिकरणं किम् ?

१५ किन्नाम तत्त्वनिर्णयः ?

***